Title स्कन्दपुराणे शिवकवचम्

Author

Extent ८ Age

Subject पुराणम् । सम्पूर्णम्

नं० १०६६५-घ

ब्रह्मोत्तरखण्डे

स्कन्दपुराणे शिवकवचम् (पुराणम्)

पत्राणि ८ (सम्पूर्णम्)

नं० १०६७-घ

६ ९=।

शि०क०

१ श्रीगणेशाय नमः ॐ अस्य श्रीशिवकवचस्तोत्रमंत्रस्य ऋ-
षभयोगीश्वरऋषिः श्रीसदाशिवरुद्रो देवता अनुष्टुप्छं-
दः ह्रां बीजं ह्रीं शक्तिः क्रों कीलकं मम समस्तपापक्ष-
यार्थं शिवकवचस्तोत्रजपे विनियोगः ॐ नमो भगवते
ॐ महारौद्राय ज्वलज्ज्वलज्वालामालिने ॐ ह्रीं श्रीं क्लीं
अंगुष्ठाभ्यां नमः ॐ नमो भगवते नं महारौ० तर्जनी
भ्यां नमः ॐ नमो भगवते मं महारौ० मध्यमाभ्यां न- १
मः ॐ नमो भगवते शिं महारौ० अनामिकाभ्यां नमः

ॐ नमो भगवते वां महारौ० कनिष्ठिकाभ्यान्नमः ॐ नमो
भगवते यें महारौ० करतलकरपृष्ठाभ्यान्नमः
एवं हृदयादि षडंगन्यासः॥ वज्रदंष्ट्रं त्रिनयनं कालकं
ठमरिंदमं सहस्रकरमत्युग्रं वंदे शंभुमुमापतिं॥ अतःपरं
ष सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रं॥ जयप्रदं सर्व
विपत्प्रमोक्षं वक्ष्यामि शैवं कवचं हिताय ते॥ ऋषभ
उवाच॥ नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरं॥ वक्ष्ये
शिवमयं वर्म सर्वरक्षाकरं नृणां॥ ३॥ शुचौ देशे समा

जितेंद्रियो ३

शि०क० २ सीनाय याज्ञवल्क्यमितासनः जितप्राणश्चिंतयेच्छिवमव्य

यं २ हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोव

काशं अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं म

हेशं ३ ध्यानावधूताखिलकर्मबंधश्चिरं चिदानंद

निमग्नचेताः षडक्षरंन्यासमाहितात्मा शैवेन

कुर्यात्कवचेन रक्षां ४ मांपातु देवोखिलदेवता

त्मा संसारकूपे पतितं गभीरे तन्नाम दिव्यंवरमंत्र

मूलं धुनोतु मे सर्वमघं हृदिस्थं ५ सर्वत्र मां रक्षतु

विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा । अणो
रणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात्
६ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरि
शोष्टमूर्त्तिः यो पां स्वरूपेण नृणां करोति संजीवनं ।
सोवतु मां जलेभ्यः ७ कल्पावसाने भुवनानि दग्
ध्वा सर्वाणि यो नृत्यति भूरिलीलः स कालरुद्रोव
तु मां दवाग्नेर्वात्यादिभीतेरखिलाच्च तापात् ८

शि०क०

३ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठार

3 पाणिः चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां दिशो रक्ष

तु मामजस्रं ९ कुठारवेदांकुशपाशशूलः कपा


लढक्काक्ष[illegible]गुणां दधानः चतुर्मु

खो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणा

स्यां १० कुंदेंदुशंखस्फटिकावभासो वेदाक्षमा

लावरदाभयांकः त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः स २

द्योधिजातो वतु मां प्रतीच्यां ११ वराक्षमालाभय



४ टंकहस्तः सरोजं किंजल्कसमानवर्णः त्रिलोच
नश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः
३२ वेदाभयेष्टांकुशपाशटंकः कपालढक्कास
कश्शूलपाणिः सितद्युतिः पंचमुखोवतान्मामी
शानमूर्ध्वं परमप्रकाशः ३३ मूर्द्धानमव्यान्म
चंद्रमौलिर्भालं ममाव्यादथ भालनेत्रः नेत्रे ममा
व्याद्भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ४
३४ पायाच्छ्रुती मे श्रुतगीतकीर्तिः कपोल

मव्यात्सततंकपालिः वक्त्रंसदारक्षतुपंचवक्त्रो
जिह्वांसदारक्षतुवेदजिह्वः १५ कंठंगिरी
शोवतुनीलकंठः पाणिद्वयंपातुपिनाकपाणिः
दोर्मूलमव्यान्ममधर्मबाहुर्वक्षस्थलंदक्षम
खांतकोव्यात् १६ ममोदरंपातुगिरींद्रध
न्वामध्यंममाव्यान्मदनांतकारी हेरंबतातो
ममपातुनाभिंपायात्कटिंधूर्जटिरीश्वरोमे
१७ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयंमे

शि० क०

जगदीश्वरोव्यात् जंघायुगंपुंगवकेतुरव्यात्पादौममाव्या
त्सुरवंद्यपादः १९ महेश्वरःपातुदिनादियामेमांमध्यया
मेवतुवामदेवः त्रियंबकःपातुतृतीययामेवृषध्वजः
पातुदिनांतयामे २० पायान्निशादौशशिशेखरोमांगंगा
धरोरक्षतुमांनिशीथे गौरीश्वरःपातुनिशावसानेमृत्यु
ञ्जयोरक्षतुसार्वकाले २१ अंतःस्थितंरक्षतुशंकरोमांस्था
णुःसदापातुबहिःस्थितंमां तदंतरेपातुपतिःपशूनां
सदाशिवोरक्षतुमांसमंतात् २२ तिष्ठंतमव्याद्भुवनै
कनाथःपायाद्व्रजंतंप्रमथाधिनाथः वेदांतवेद्योवतु
मांनिषण्णांमामव्ययःपातुशिवःशयानं २३ मार्गेषुमां

रक्षतु नीलकंठः शैलारिर्दुर्गेषु पुरत्रयारिः अरण्ये वामारिः
महाप्रवासे पायान्मृगव्याधः उद्दामशक्तिः २४ कल्पांत
काटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डकोशः घोरारिः
सेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः २५ पत्त्यश्वमा
तंगघटावरूथः सहस्रलक्षायुतकोटिभीषणं अक्षौहिणी
नां शतमाततायिनां छिंद्यान्मृडो घोरकुठारधारया २६ नि
हंतु दस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांत
कस्य शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुः
पिनाकः २७ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भि
क्षदुर्व्यसनदुःसहदुर्यशांसि उत्पाततापविषभीतिम

शि०क०
९
6
समूहार्तिव्याधीश्च नाशयतु मे जगतामधीशः २९ ॐ
नमो भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमंत्रस्वरू
पाय सर्वयंत्राधिष्ठिताय सर्वतंत्रस्वरूपाय सर्वतत्त्वविदूराय
ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वतीमनोहरप्रियाय सोम
सूर्याग्निलोचनाय भस्मोद्धूलितविग्रहाय महामणिमुकु
टधारणाय माणिक्यभूषणाय सृष्टिस्थितिप्रलयकालरौद्रा
वताराय दक्षाध्वरध्वंसकाय महाकालभेदनाय मूलाधारै
कनिलयाय तत्त्वातीताय गंगाधराय सर्वदेवाधिदेवाय षडा
श्रयाय वेदांतसाराय त्रिवर्गसाधनायानेककोटिब्रह्मांड
नायकायानंतवासुकितक्षककर्कोटकशंखकुलिकप
द्ममहापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय चि

दाकाशाया काशादिस्वरूपाय ग्रहनक्षत्रमालिने सकलाय
कलंकरहिताय सकललोकैककर्त्रे सकललोकैकसंहर्त्रे
सकललोकैकगुरवे सकललोकैकसाक्षिणे सकलनिगम
गुह्याय सकलवेदांतसारगाय सकललोकैकवरप्रदाय सक
ललोकैकशंकराय शशांकशेखराय शाश्वतनिजावासाय
निराभासाय निरामयाय निर्मलाय निर्लोभाय निर्मदाय नि
श्चिंताय निरहंकाराय निराकुलाय निष्कलंकाय निर्गुणाय
निष्कामाय निरूपप्लवाय निरवंद्याय निरंतराय निष्कारणा
य निरंतकाय निष्प्रपंचाय निसंगाय निर्द्वंद्वाय निराधारा
य निरागाय निष्क्रोधाय निर्भयाय निष्पापाय निर्विक

७ त्याय निर्भेदार्यैश्वर्याय निष्कलाय निःसंसाराय निरञ्जनाय नि
रूपमविभवाय नित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयाय परमशां
तस्वरूपाय तेजोरूपाय तेजोमयाय जयजयरुद्रमहारौद्रभद्रावता
र महाभैरव कालभैरव कल्पांतभैरव कपालमालाधर खट्वांगखड्
गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंदिमालातोम
रमुसलमुद्गरपाशपट्टिशपरिघभुशुंडीशतघ्नीचक्राद्यायुधभीष
ण करसहस्रमुखदंष्ट्राकरालवदन विकटाट्टहास विस्फारित
ब्रह्मांडमंडल नागेंद्रकुंडल नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मध
र मृत्युंजय त्र्यंबक त्रिपुरांतक विश्वरूप विरूपाक्ष विश्वेश्वर
वृषभवाहन विश्वतोमुख सर्वतो रक्ष मां ज्वलज्वल महामृत्यु
मपमृत्युभयं नाशय नाशय रोगभयमुत्सादयोत्सादय विषसर्प

भयं शमय शमय चोरान्मारय मारय मम शत्रूनुच्चाटयोच्चाटय शू
लेन विदारय विदारय कुठारेण भिंधि भिंधि खड्गेन छिंधि छिंधि
खट्वांगेन विपोथय विपोथय मुसलेन निष्पेषय निष्पेषय बाणैः सं
ताडय संताडय रक्षांसि भीषय भीषया शेषभूतानि विद्रावय विद्रा
वय कुष्मांडवेतालमारीगणब्रह्मराक्षसान् संत्रासय संत्रासय ।
ममाभयं कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय नरकभयान्मा
मुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्यां मामाप्यायाप्यायय
दुःखातुरं मामानंदयानंदय शिवकवचेन मामाच्छादयाच्छादय
मृत्युंजय त्र्यंबक सदाशिव नमस्ते नमस्ते ॥ ३००० ॥ ऋषभ उवा
च इत्येतत्कवचं शैवं वरदं व्याहृतं मया सर्वबाधाप्रशमनं रहस्यं
सर्वदेहिनां २९ यः सदा धारयेन्मर्त्यः शैवं कवचमुत्तमं न तस्य

[illegible]

[illegible]

शि०क० जायतेकापिभयंशंभोरनुग्रहात ३० क्षीणायुःप्राप्तमृत्युर्वामहारोग

हतोपिवा सद्यःसुखमवाप्नोतिदीर्घमायुश्चविंदति सर्वदारिद्र्यशमनं

१६ सौमंगल्यविवर्द्धनं योधत्तेकवचंशैवंसदेवैरपिपूज्यते महापातक

संघातैर्मुच्यतेचोपपातकैः देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः

त्वमपिश्रद्धयावत्सःशैवंकवचमुत्तमं धारयस्वमयादत्तंसद्यश्रेयो

ह्यवाप्स्यसि ३४ सूतउवाच इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसून

वे ददौशंखमहानादंखड्गंचारिनिषूदनं पुनश्चभस्मसंमंत्र्यतदंगंपरि

तोस्पृशत् गजानांषट्सहस्रस्यद्विगुणस्यबलंददौ भस्मप्रभावात्सं

प्राप्यबलैश्वर्यधृतिस्मृतिः सराजपुत्रःशुशुभेशरदर्कइवश्रिया

तमाहप्रांजलीभूयःसयोगीनृपनंदनं एषखड्गोमयादत्तःतपोमंत्रा

नुभावतः शितधारमिमंखड्गंयस्मैदर्शयसेस्फुटं ससद्योम्रियतेश

त्रुःसाक्षान्मृत्युरपिस्वयं अस्यशंखस्यनिर्ह्रादंयेशृण्वंतितवाहिताः

तेमूर्छितापतिष्यंतिन्यस्तशस्त्राविचेतनाः खड्गशंखाविमौदिव्यौ

परसैन्यविनाशिनौ आत्मसैन्यस्वपक्षाणांशौर्यतेजोविवर्द्धनौ एत

योश्च[illegible]भावेनशैवेनकवचेनच द्विषट्सहस्रनागानांबलेनमहतापिच